ॐ श्री परमात्मने नमः । श्रीमद् भगवद् गीताथ अष्टमोऽध्यायः । अक्शरब्रह्मयोगः

om śrī paramātmane namaḥ | śrīmad bhagavad gītāatha aṣṭamo'dhyāyaḥ|
(akśarabrahmayogaḥ)

अर्जुन उवाच । arjuna uvāca |

किं तद् ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम ।

अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते ॥ ८.१ ॥

kiṁ tad brahma kimadhyātmaṁ kiṁ karma puruṣottama |
adhibhūtaṁ ca kiṁ proktamadhidaivaṁ kimucyate || 8.1||

अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन ।

प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः ॥ ८.२ ॥

adhiyajñaḥ kathaṁ ko'tra dehe'sminmadhusūdana |
prayāṇakāle ca kathaṁ jñeyo'si niyatātmabhiḥ || 8.2||

श्रीभगवानुवाच । śrībhagavānuvāca |

अक्शरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।

भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः ॥ ८.३ ॥

akśaraṁ brahma paramaṁ svabhāvo'dhyātmamucyate |
bhūtabhāvodbhavakaro visargaḥ karmasañjñitaḥ || 8.3||

अधिभूतं क्शरो भावः पुरुषश्चाधिदैवतम् ।

अधियज्ञोऽहमेवात्र देहे देहभृतां वर ॥ ८.४ ॥

adhibhūtaṁ kśaro bhāvaḥ puruṣaścādhidaivatam |
adhiyajño'hamevātra dehe dehabhṛtāṁ vara || 8.4||